श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीभूस्तुतिः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीभूस्तुतिः ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

सङ्कल्प कल्प लतिकामवधिं क्षमायाः
स्वेच्छा वराह महिषीं सुलभानुकम्पाम्।
विश्वस्य मातरमकिंचन कामधेनुं
विश्वंभरामशरणः शरणं प्रपद्ये॥ १ ॥

त्वां व्याहृतिः प्रथमतः प्रणवः प्रियं ते
संवेदयत्यखिल मन्त्र गणस्तमेव।
इत्थं प्रतीत विभवामितरेष्विदानीं
स्तोतुं यथावदवने क इवार्हति त्वाम्॥ २ ॥

नित्यं हिताहित विपर्यय बद्ध भावे
त्वद्वीक्षणैक विनिवर्त्य बहु व्यपाये।
मुग्धाक्षरैरखिल धारिणि मोदमाना
मातः स्तनन्धय धियं मयि वर्तयेथाः॥ ३ ॥

सङ्कल्प किंकर चराचर चक्रवालं
सर्वातिशायिनमनन्त शयस्य पुंसः।
भूमानमात्म विभवैः पुनरुक्तयन्ती
वाचामभूमिरपि भूमिरसि त्वमेका॥ ४ ॥

वेधस्तृणावधि विहार परिच्छदं ते
विश्वं चराचरतया व्यतिभिद्यमानम्।
अम्ब त्वदाश्रिततया परिपोषयन्ती
विश्वंभरस्य दयिताऽसि तदेक नामा॥ ५ ॥

सर्वंसहेत्यवनिरित्यचलेति मातः
विश्वंभरेति विपुलेति वसुन्धरेति।
अन्यानि चान्यविमुखान्यभिधान वृत्त्या
नामान्यमूनि कथयन्ति तवानुभावम्॥ ६ ॥

तापान् क्षिपन् प्रसविता सुमनो गणानां
प्रच्छाय शीतळ तलः प्रदिशन् फलानि।
त्वत्सङ्गमात् भवति माधवि लब्ध पोषः
शाखा शतैरधिगतो हरि चन्दनोऽसौ॥ ७ ॥

स्मेरेण वर्धित रसस्य मुखेन्दुना ते
निस्पन्दतां विजहतो निजया प्रकृत्या।
विश्रान्ति भूमिरसि तत्त्व तरङ्ग पङ्क्तेः
वेलेव विष्णु जलधेरपृथग्भवन्ती॥ ८ ॥

स्वाभाविके वसुमति श्रुतिभिर्विभाव्ये
पत्युर्महिम्नि भवतीं प्रतिपन्न वासाम्।
शङ्के विमान वहन प्रतिमा समानाः
स्तम्बेरम प्रभृतयोऽपि वहन्ति सत्त्वाः॥ ९ ॥

संभावयन् मधुरिपुः प्रणयानुरोधात्
वक्षःस्थलेन वरुणालय राजकन्याम्।
विश्वंभरे बहुमुख प्रतिपन्न भोगः
शेषात्मना तु भवतीं शिरसा दधाति॥ १० ॥

क्रीडा वराह दयिते कृतिनः क्षितीन्द्राः
संक्रन्दनस्तदितरेऽपि दिशामधीशाः।
आमोदयन्ति भुवनान्यळिकाश्रितानाम्
अम्ब त्वदङ्घ्रि रजसां परिणाम भेदैः॥ ११ ॥

भूतेषु यत् त्वदभिमान विशेष पात्रं
पोषं तदेव भजतीति विभावयन्तः।

भूतं प्रभूतगुण पञ्चकमाद्यमेतत्
प्रायो निदर्शनतया प्रतिपादयन्ति॥ १२ ॥

कान्तस्तवैष करुणा जलधिः प्रजानाम्
आज्ञातिलङ्घन वशादुपजात रोषः।
अह्नाय विश्व जननि क्षमया भवत्या
सर्वावगाहन सहामुपयात्यवस्थाम्॥ १३ ॥

आश्वासनाय जगतां पुरुषे परस्मिन्
आपन्न रक्षण दशामभिनेतुकामे।
अन्तर्हितेतर गुणादबला स्वभावात्
औदन्वते पयसि मज्जनमभ्यनैषीः॥ १४ ॥

पूर्वं वराह वपुषा पुरुषोत्तमेन
प्रीतेन भोगि सदने समुदीक्षितायाः।
पादाहताः प्रळय वारिधयस्तवासन्
उद्वाह मङ्गळ विधेरुचिता मृदङ्गाः॥ १५ ॥

व्योमातिलङ्घिनि विभोः प्रळयाम्बु राशौ
वेशन्त लेश इव मातुमशक्य मूर्तेः।
सद्यः समुद्र वसने सरसैरकार्षीः
आनन्द सागरमपारमपाङ्ग पातैः॥ १६ ॥

दंष्ट्रा विदारित महासुर शोणिताङ्कैः
अङ्गैः प्रियस्तव दधे परिरम्भ लीलाम्।
सा ते पयोधि जल केळि समुत्थितायाः
सैरन्ध्रिकेव विदधे नवमङ्गरागम्॥ १७ ॥

अन्योन्य संवलन जृम्भित तूर्य घोषैः
संवर्त सिन्धु सलिलैर्विहिताभिषेका।
एकातपत्रयसि विश्वमिदं गुणैः स्वैः
अध्यास्य भर्तुरधिकोन्नतमंस पीठम्॥ १८ ॥

भर्तुस्तमाल रुचिरे भुज मध्य भागे
पर्याय मौक्तिकवती पृषतैः पयोधेः।
तापानुबन्ध शमनी जगतां त्रयाणां
तारापथे स्फुरसि तारकिता निशेव॥ १९ ॥

आसक्त वासव शरासन पल्लवैस्त्वां
संवृद्धये शुभ तटिद्गुण जाल रम्यैः।
देवेश दिव्य महिषीं धृत सिन्धु तोयैः
जीमूत रत्न कलशैरभिषिञ्चति द्यौः॥ २० ॥

आविर्मदैरमर दन्तिभिरुह्यमानां
रत्नाकरेण रुचिरां रशना गुणेन।
मातस्त्रिलोक जननीं वन मालिनीं त्वां
माया वराह महिषीमवयन्ति सन्तः॥ २१ ॥

निष्कण्टक प्रशम योग निषेवणीयां
छाया विशेष परिभूतसमस्त तापाम्।
स्वर्गापवर्गसरणिं भवतीमुशन्ति
स्वच्छन्द सूकरवधूमवधूत पङ्काम्॥ २२ ॥

गण्डोज्ज्वलां गहन कुन्तळ दर्शनीयां
शैलस्तनीं तरळ निर्झर लम्ब हाराम्।
श्यामां स्वतस्त्रियुग सूकर गेहिनि त्वं
व्यक्तिं समुद्र वसनामुभयीं बिभर्षि॥ २३ ॥

निःसंशयैर्निगम सीमनि विष्णुपत्नि
प्रख्यापितं भृगु मुखैर्मुनिभिः प्रतीतैः।
पश्यन्त्यनन्य पर धी रस संस्कृतेन
सन्तः समाधि नयनेन तवानुभावम्॥ २४ ॥

संचोदिता करुणया चतुरः पुमर्थान्
व्यातन्वती विविध मन्त्र गणोपगीता।

संचिन्त्यसे वसुमति स्थिर भक्ति बन्धैः
अन्तर्बहिश्च बहुधा प्रणिधान दक्षैः॥ २५॥

क्रीडा गृहीत कमलादि विशेष चिह्नां
विश्राणिताभयकरां वसुधे सभूतिम्।
दौर्गत्य दुर्विष विनाश सुधा नदीं त्वां
संचिन्तयन् हि लभते धनदाधिकारम्॥ २६॥

उद्वेल कल्मष परम्परितादमर्षात्
उत्तंसितेन हरिमञ्जलिनाऽप्यधृष्यम्।
आकस्मिकोऽयमधिगम्ययति प्रजानाम्
अम्ब त्वदीय करुणा परिणाम एव॥ २७॥

प्रत्येकमब्द नियुतैरपि दुर्व्यपोहात्
प्राप्ते विपाकसमये जनितानुतापात्।
नित्यापराध निवहाच्चकितस्य जन्तोः
गन्तुं मुकुन्द चरणौ शरणं क्षमे त्वम्॥ २८॥

त्राणाभिसंधिसुभगेऽपि सदा मुकुन्दे
संसार तन्त्र वहनेन विळम्बमाने।
रक्षा विधौ तनुभृतामनघानुकम्पा
मातः स्वयं वितनुषे महतीमपेक्षाम्॥ २९॥

धर्म द्रुहं सकल दुष्कृति सार्वभौमम्
आत्मानभिज्ञमनुतापलवोज्झितं माम्।
वैतान सूकरपतेश्चरणारविन्दे
सर्वंसहे ननु समर्पयितुं क्षमा त्वम्॥ ३०॥

ताप त्रयीं निरवधिं भवती दयार्द्राः
संसार घर्म जनितां सपदि क्षिपन्तः।
मातर्भजन्तु मधुरामृत वर्ष मैत्रीं
माया वराह दयिते मयि ते कटाक्षाः॥ ३१॥

पत्युर्दक्षिण पाणि पङ्कज पुटे विन्यस्त पादाम्बुजा
वामं पन्नग सार्वभौम सदृशं पर्यङ्कयन्ती भुजम्।
पोत्र स्पर्श लसत्कपोल फलका फुल्लारविन्देक्षणा
सा मे पुष्यतु मङ्गळान्यनुदिनं सर्वाणि सर्वंसहा॥ ३२ ॥

अस्येशाना जगत इति या श्रूयते विष्णुपत्नी
तस्याः स्तोत्रं विरचितमिदं वेङ्कटेशेन भक्त्या।
श्रद्धा भक्ति प्रचय गुरुणा चेतसा संस्तुवानः
यद्यत् काम्यं सपदि लभते तत्र तत्र प्रतिष्ठाम्॥ ३३ ॥

॥ इति श्रीभूस्तुतिः समाप्ता ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥